
**श्लोकव्याख्यानक्रीडा**



**अस्तं गते दिनकरे महदन्धकार-**
**युक्तेऽम्बुधौ शमिततुङ्गतरङ्गसंघे ।**
**हंसोऽयमूर्ध्वपदयानकुतूहली स-**
**न्नास्ते ह्ययं हि महतां महनीयमाहुः।।**

अन्वयः - दिनकरे अस्तंगते शमिततुङ्गतरङ्गसंघे महदन्धकारयुक्तेऽम्बुधौ अयं हंसः ऊर्ध्वपदयानकुतूहली सन् आस्ते । अयं हि महतां महनीयमाहुः। अस्य पद्यस्य व्याख्येयम् - अस्तं गते इति । कस्मिन्नस्तंगते इत्याकाङ्क्षायामाह दिनकरेति। दिनकरः सूर्यः तथा च कोशे "सूर्यो दिनकरः पुंसि" इति । सूर्ये अस्तमिते इत्याशयः । सूर्ये अस्तमिते किं सञ्जातमित्याकाङ्क्षायामाह शमिततुङ्गतरङ्गसंघे तुङ्गाः तरङ्गाः तुङ्गतरङ्गाःशमिताः तुङ्गतरङ्गाः शमिततुङ्गतरङ्काः तेषां संघः समूहः शमितुङ्गतरङ्गसंघः तस्मिन् शमिततुङ्गतरङ्गसंघे इति विग्रहः तथा च महदन्धकारयुक्तेऽम्बुधौ शान्तीकृतोन्नतोर्मियुक्तवारान्निधौ महदतिसान्द्रतिमिरयुक्तावुदधौ सञ्जाते सतीत्याशयः।

अम्बुधौ शान्ते सति किमभूदित्याकाङ्क्षायामुच्यते हंसोऽयमूर्ध्वपदयानकुतूहली इति । ऊर्ध्वं उन्नतं पदं ऊर्ध्वपदं । ऊर्ध्वपदं प्रति यानं सञ्चरणं ऊर्ध्वपदयानसञ्चरणं। ऊर्ध्वपदयाने कुतूहली ऊर्ध्वपदयानकुतूहली । तथा हि अयं हंसः ऊर्ध्वपदयानकुतूहली उन्नतस्थानगमनकौतुकवान् सन्नास्ते उन्नतपदगमनाभिलाषमावहन् आस्ते वर्तते इत्याशयः । राजहंसानां केलासं प्रति सञ्चारः कवि प्रसिद्धः । तथा च मेघदूते "आकैलासाद्बिसकिसलयच्छेदपाथेयवन्तः सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः" इति ।

श्लोकेस्मिन् लक्षणया दिनकरस्य सवितुः ज्ञानप्रदायकत्वेन, अन्धकारस्य अज्ञानपरवाच्यत्वात् ,सागरस्य संसारसागरपरत्वात् ,हंसस्य परमहंसपरत्वात् ,ऊर्ध्वपदयानकौतुकस्य मोक्षेच्छार्थकत्वाच्च अद्वैतवेदान्तपरो अर्थोपि संगच्छते । तदित्थम् । सूर्ये अस्तमिते समुद्रे शान्ते च हंसः परमहंसः ऊर्ध्वपदयानकुतूहली सन् निजस्वरूपसाक्षात्काराखण्डानुभवचित्तवृत्त्या ब्रह्मसाक्षात्काररूपमोक्षाख्योन्नतपदगमने प्रापणे कुतुकी सन् आस्ते वर्तते । यतो हि सन्ध्यासमयः एव योगिनां ध्यानादियोगचर्यायाणां निर्वहणे ऊत्तमत्वेन कथ्यते । कुमारसंभवे अपि भगवान् महेश्वरः नवोढां हिमवत्पुत्रीं प्रति सन्ध्ययाः महत्वम् सकलजनाभिवन्द्यतां च कथयत्येवं - अद्रिराजतनये तपस्विनः पावनाम्बुविहिताञ्जलिक्रियाः ब्रह्म गूढमभिसन्ध्यमादृताः शुद्धये विधिविदो गृणन्त्यमी इति । तस्मात् अयं हि महतां महनीयमाहुःइति । अत्यन्तं महत्वं महनीयम् । तुरिष्ठमेयसुः इति सूत्रेण महच्छब्दात् ईयसु प्रत्यये परेमहनीयमिति रूपम् । मोक्षाकांक्षा हि महतां महत्वम्। "यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इति तैत्तरीयकोपनिषत्।

ननु मुख्यार्थबाधे एव लक्षणा संगच्छते । अत्र मुख्यार्थस्य अबाध्यत्वात् लाक्षणिकारथपरिग्रहः कथं संगच्छते। उच्यते । अस्ति हि मुख्यार्थबाधः। यद्यपि सन्ध्यावेलायां हंसः समुद्रतीरे ऊर्ध्वपदमाकाशस्योन्नतपदं प्रति गमनकुतुकी सन्नास्ते इति अर्थः सङ्गच्छते तथापि अयं हि महतां महनीयमाहुः इत्यत्र पूर्वेण सह अर्थसमन्वये बाधः जायते। यतो हि केवलस्य हंसस्य ऊर्ध्वपदगामित्वे न कोपि महत्वं प्रसिद्धम् । अतः मोक्षात्मकप्रयोजनार्थपरत्वलाक्षणिकार्थः अत्र स्वीकृतः । तथा हि काव्यप्रकाशे मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् अन्य़ोर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया इति ।

अत्र समासोक्तिरलङ्कारः। प्रस्तुतस्य समुद्रतीरस्थितस्य हंसस्य स्थितेः अप्रस्तुतेपरहंसध्यानात्मकस्थितौ परिस्फूर्त्तित्वात्। समासोक्तिः परिस्फूर्त्तिः प्रस्तुतेप्रस्तुतस्य यत् इति तल्लक्षणात् । वसन्ततिलकावृत्तं उक्ता वसन्ततिलका तभजा जगौगः इति तल्लक्षणम्।इति शम्

തൃപ്പൂണിത്തുറ സംസ്കൃതകോളേജിലെ സാഹിത്യവിഭാഗം മേധാവി ഡോ. സരിത മഹേശ്വരൻ വാട്സ് ആപ്പിൽ അയച്ചു തന്ന ചിത്രം ( മുകളിൽ ചേർത്തിരിക്കുന്നത്) കണ്ടപ്പോൾ തോന്നിയ ശ്ലോകമാണിത് അതിന് ഒരുവ്യാഖ്യാനവും പടച്ചു വച്ചു എന്നു പറയുന്നതാവും ശരി. അവിവേകത്തിന് മാപ്പിരന്നുകൊണ്ട് തിരുത്തലുകൾക്കും നിർദ്ദേശങ്ങൾക്കുമായി സമർപ്പിക്കുന്നു

Sankaranarayanan.AHSST Sanskrit Govt.Sanskrit HSS Thripunithura
E Mail sankarjikodakara@gmail.com Phone - 9744780455